Homas
the spiritual way to success
K. Krishna Prasad Bhat
Website: http://homas.in
Email: homasonline@gmail.com
Mobil: 8000858858 /9940406777



अथान्नगोपालादिमन्त्रप्रसङ्गात् अन्नप्रददधिवामनमन्त्रोऽपि मन्त्रदेवताप्रकाशिकोक्तप्रकारेण लिख्यते—

चन्द्र ऋषिः। विराट् छन्दः। दधिवामनो देवता। ओं बीजम्। स्वाहा शक्तिः। इष्टार्थे विनियोगः। ओं हृत्। नमः शिरः। विष्णवे शिखा। सुरपतये कवचम्। महाबलाय नेत्राभ्याम्। स्वाहा अस्त्रम्। ओं नमो विष्णवे सुरपतये महाबलाय स्वाहा इति मन्त्रः। अन्नप्रदोऽयं मन्त्रः। अस्य न्यासविधिः— षडङ्गान्यङ्गुळीष्वपि विन्यस्य मूलेन व्यापकं कृत्वा, मूलमन्त्राक्षराणि शिरोललाटनेत्रद्वयकर्णद्वयोष्ठद्वयतालुकण्ठबाहुहृदयोदरनाभिगुह्योरुजङ्घापादेषु विन्यस्य ऋष्यादीन्विधाय ध्यायेत्॥

मुक्तागौरं नवमणिलसद्भूषणं चन्द्रसंस्थं
भृङ्गाकारैरळकनिकरैश्शोभिवक्त्रारविन्दम्।
हस्ताब्जाभ्यां कनककलशं शुद्धतोयाभिपूर्णं
दध्यन्नाढ्यं कनकचषकं धारयन्तं भजामः॥

चतुर्लक्षजपः। आज्याक्तैस्तिलैर्दशांशं पुरश्चरणाहोमः। दध्यन्नेन वा॥

अथ पूजा—

पञ्चदशपटले प्रोक्तचन्द्रपीठे समावाह्य वामनमूर्तिं समर्चयेत्। अङ्गैः प्रथमावृतिः। पूषायै० सुमनसायै० प्रीत्यै० तुष्ट्यै० पुष्ट्यै० वृद्ध्यै० धृत्यै० सौम्यायै० मरीचिन्यै० अंशुमालिन्यै० तिष्ठायै० उद्गतायै० लक्ष्म्यै० इच्छायै० संपूर्णायै० मण्डलायै० १६ इत्याभिः शुभ्रवर्णाम्बरभूषणाभयवरकराभिः

षोडशकलारूपशक्तिभिः द्वितीया । सशक्तिकवासुदेवादिभिस्तृतीया । शान्त्यै० श्रियै० सरस्वत्यै० रत्यै० इति वासुदेवादीनां शक्तयः कोणेषु । मूर्तयो दिक्षु । केशवादिभिर्द्वादशनामभिश्चतुर्थी । कुमुदाय० कुमुदाक्षाय० पुण्डरीकाय० वामनाय शंकुकर्णाय० सर्वनेत्राय० सुमुखाय० सुप्रतिष्ठाय० पिङ्गलाय० हरिसेनाय १० एतैश्शुभ्रवर्णैः शङ्खचक्रगदापद्मपाणिभिः पञ्चमी । लोकपालैष्षष्ठी ॥

अथ प्रयोगः —

प्रतिदिनं दध्यन्नदशाहुतिहोमात् संपूर्णान्नो भवति । प्रतिदिनं नियमेन सहस्रजपादन्नसमृद्धिकरश्च मुक्तिकरश्च ॥

अन्नकामो हुनेन्नित्यमष्टाविंशतिसंख्यया ।
सितान्नं घृतमिश्रं तु प्राप्नुयादन्नमक्षयम् ॥

सितान्नं-शर्करान्नम् ।

अपूपं षड्रसोपेतं हुनेच्चाष्टसहस्रकम् ।
अलक्ष्मीर्नाशमाप्नोति महतीं श्रियमाप्नुयात् ॥

अयुतं चाहुतीर्हुत्वा दध्यन्नं शर्करायुतम् ।
अन्नपर्वतमाप्नोति यत्र यत्र स गच्छति ॥

हुनेत् बिल्वसमीपस्थः पद्माक्षैरयुतं नरः ।
वसुन्धरा महालक्ष्मीः वसु वर्षति तत्र तु ॥

विद्यार्थी प्रजपेन्नित्यं ध्यायन्नेव जनार्दनम् ।
जुहुयात्पायसं मन्त्रैः साक्षाद्वागीश्वरो भवेत् ॥

पुत्रकामो जपेल्लक्षं पुत्रजीवफलैर्हुनेत् ।
तत्काष्ठदीपिते वह्नौ स सत्पुत्रमवाप्नुयात् ॥

ध्यात्वा त्रिविक्रमं देवं रक्ताभं करवीरकैः ।

हुनेदयुतसंख्याकैः सर्वत्र विजयी भवेत् ॥

राज्यकामोपि पद्मानामयुतं जुहुयान्नरः ।
ध्यात्वा चेन्द्रपदं राज्यं लभेच्चिरमकण्टकम् ॥

अपामार्गदलैर्हुत्वा लवङ्गै(ङ्गै)र्वा मधुप्लुतैः ।
अयुतं साध्यनामान्तं महावश्यक्रियां लभेत् ॥

अपामार्गदलं–तदीयपत्रम् ।

आरोग्यकामी जुहुयादपामार्गैश्शतं शतम् ।
आयुष्काममिमध्वक्ततिलदूर्वाङ्कुराक्षतैः ॥

अयुतं जुहुयात्तावज्जपेदायुर्लभेत् चिरम् ।
स्मृत्वा त्रैविक्रमं रूपं जपेद्दशसहस्रकम् ॥

मुक्तो बन्धाद्भवेत्सद्यः नात्र कार्या विचारणा ।

अथ यन्त्रमुच्यते —

ससाध्यलक्ष्मीप्रणवाढ्यकर्णिकं मन्त्राक्षरद्वन्द्वदलाष्टकं च ।
शिष्टार्णयुग्मोल्लसितान्त्यपत्रं अष्टाक्षरैरुज्वलपत्रकाग्रम् ॥

परीतमुद्वादशवर्णमन्त्रं ततो बहिर्मातृकया च वीतम् ।
ततो बहिः पूर्णमखण्डबीजं यन्त्रं त्विदं श्रीमदभीष्टदं च ॥

अस्यार्थः — अष्टपत्रकर्णिकायां प्रणवं तन्मध्ये श्रीबीजं तन्मध्ये साध्यनाम, अष्टदलमध्ये मन्त्रस्य वर्णद्वयं अन्त्ये अवशिष्टं वर्णद्वयं च । दलाग्रे प्रसिद्धाष्टाक्षरं, तद्बहिः प्रथमे वृत्ते वासुदेवद्वादशाक्षरमन्त्रेण वेष्टयेत् । द्वितीये वृत्ते मातृकया तद्बहिः प्रणवेन वेष्टयेत् ॥

अथ पद्मेश्वरवामनमन्त्रः —

नळकूबर ऋषिः । अतिजगती छन्दः । यज्ञेश्वरवामनो देवता । क्लीं बीजम् । स्वाहा शक्तिः । क्लां हृत् । क्लीं शिरः इत्याद्यङ्गानि । ध्यानादिकं पूर्ववत् । ओं क्लीं श्रीं ठं नमो भगवते विष्णवे सुरपतये महानलाय स्वाहा ॥ इति मन्त्रः । यज्ञेश्वरसमानैश्वर्यप्रदः ॥

अथ भोगवामनमन्त्रः —

कपिल ऋषिः । गायत्री छन्दः । भोगवामनो देवता । ओं बीजम् । स्वाहा शक्तिः । मन्त्रपदैः पञ्चाङ्गानि । ध्यानम् —

नीलवर्णश्चतुर्बाहुः शङ्खचक्रगदाब्जधृक् ।
सर्वान्भोगान्ददात्येष भक्तानां भोगवर्धनः ॥

ओं नमो भगवते विष्णवे महाबलाय स्वाहा ॥ इति मन्त्रः ॥

अथ विश्ववामनमन्त्रः —

ब्रह्मा ऋषिः । गायत्री छन्दः । मायाबालकवामनो देवता । ओं बीजम् । स्वाहा शक्तिः । मन्त्रपदैः पञ्चाङ्गानि ॥

पीताम्बरोत्तरीयोसौ मौञ्जीकौपीनधृक् हरिः ।
कमण्डलुं च दध्यन्नं दण्डं छत्रं करे दधन् ॥

यज्ञोपवीततत्वाङ्गो ध्यातव्यो वामनस्सदा ।

नमो मायाबालकविष्णवे महाबलाय स्वाहा ॥ इति मन्त्रः ॥

अन्नविद्याभूमिदोयं भक्तानामभयंकरः ।

एतेषां मन्त्राणां पुरश्चरणादिकं पूर्ववत् ॥ इति मन्त्र देवताप्रकाशिकोक्ता वामनमन्त्राः ॥

अथ वैश्रवणमन्त्र उच्यते —